दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-87

1 20.01.2024 शनिवासरः वि.सं. २०८० पौषशुक्ल दशमी माघ 6 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com



चिकित्सकान्दोलनम् - चिकित्सकानां घोषणा यावत् याचनापूर्तिः न भवति तावत् विरोधः निरन्तरं भविष्यति 2





सर्वकारस्य दृष्टिः कोचिंग संस्थानेषु वर्तते, अधुना १६ वर्षाणाम् अधः बालकाः संस्थानेषु प्रवेशं न प्राप्नुयुः 3





।। श्रीरामायणकथा ।। इन्द्रद्वारा अमृतसेचनेन वानरसैन्यानां पुनर्जीवनम् 4




## बेंगलुरौ नूतन-बोइंग-विमान-परिसरस्य उद्घाटनम् कृतम् प्रधानमन्त्रिणा




प्रधानमन्त्रिणा श्रीनरेन्द्र मोदिना बेंगलुरौ नूतन-बोइंग-विमान-परिसरस्य उद्घाटनम् कृतम्। अमुना तत्र बोइंग-सुकन्या-योजना-कार्यक्रमस्य अपि प्रवर्तनम् कृतम्, यस्य उद्देश्यः सी.एस.आर. इति कार्यक्रमस्य अंतर्गतं निर्धन परिवाराणां कन्यकाभ्यः विज्ञान-प्रौद्योगिकी-आभियान्त्रिकी- गणित-विषयेषु सम्यक्तया प्रशिक्षण-प्रदानम् अस्ति। सभां सम्बोधयता, प्रधानमन्त्रिणा प्रोक्तं यत् सम्प्रति देशे व्यापार-कार्येषु सुगमतायाः, मेक इन इंडिया उपक्रमस्य, सुष्ठुतर-सम्पर्क-साधनानां, अन्येषां च विभिन्न क्षेत्राणां विकासः जातः । येन विकासेन भूरि आजीविकायाः अवसराः अपि उत्पन्नाः जाताः सन्ति। हितधारकेभ्यश्चापि नूतनाः अवसराः समुत्पन्नाः अभवन्। अमुना प्रोक्तं यत् उड्डयन-योजनायाः, विमानन क्षेत्रे आवश्यक-आधारिक संरचना-निर्माणेन अपि क्षेत्रमिदं संवर्धितम् अस्ति।

## जनवरी द्वाविंश्यां एकोनविंशति-मितेभ्यः असाधारण बालकेभ्यः प्रधानमन्त्रि-राष्ट्रिय-बाल- पुरस्काराः प्रदास्यन्ते

राष्ट्रपतिः द्रौपदीमुर्मुः ऐषमो जनवरी द्वाविंश्यां विज्ञान-भवने आयोक्ष्यमाणे पुरस्कार- समारोहे एकोनविंशति-मितेभ्यः असाधारण बालकेभ्यः अस्य वर्षस्य प्रधानमन्त्रि राष्ट्रिय-बाल-पुरस्कारान् समर्ज्य तान् सम्मानयिष्यति। अथ च प्रधानमन्त्री श्रीनरेन्द्रमोदी जनवरी त्रयोविंश्यां पुरस्कार-विजेतृभिः साकं सम्भाषणम् आचरिष्यति। प्रधानमन्त्रि राष्ट्रिय-बाल-पुरस्कारः, कला- संस्कृति-वीरता-नवाचार-विज्ञान-प्रौद्यगिकी समाजसेवा-खेल-प्रभृतीनां समेषां क्षेत्राणां असाधारणोपलब्धि-युतेभ्यः समस्त-देशात् प्रचितेभ्यः सर्वेभ्यः उत्कृष्ट-बालकेभ्यः प्रदीयते।

# केन्द्र-सर्वकारः वंचित-परिवाराणां सेवायै जीवनं सुगमं कर्तुं च विभिन्न- विकास-परियोजनाः प्रारब्धवान्- प्रधानमन्त्री




प्रधानमन्त्री नरेन्द्रमोदी प्रावोचत् यत् तस्य प्रशासनं देशे वंचित-परिवाराणां सेवायै समर्पितमस्ति। अमुना प्रोक्तं यत् सर्वकारः एतेषां परिवाराणां जीवनं सुगमं कर्तुं विभिन्न- योजनाः प्रारभत। प्रधानमन्त्री न्यगदत् यत् शासनेन दशकोटिमिताः शौचालयाः, चतुःकोटिमितानि च भवनानि पूर्वमेव जनेभ्यः उपपादितानि सन्ति। मोदी महाराष्ट्रस्य सोलापुर- मध्ये अनेक- विकास-परियोजनानाम् आधारशिला- स्थापनापूर्वकं तासाम् उद्घाटनस्य अनन्तरं जनान् संबोधयति स्म। प्रधानमन्त्री उक्तवान् यत् तस्य सर्वकारः पञ्चविंशतिः-कोटिकान् जनान् निर्धनताताः बहिरानीतवान्। मोदिना भणितं यत् "प्रधानमन्त्रि- निर्धन- कल्याण- योजना" अग्रेऽपि पञ्चवर्षाणि यावत् यथावस्थामेव प्रवर्तयिष्यते। प्रधानमन्त्रि- पौरावास- योजनायाः अन्तर्गतं निर्मितानि नवतिः सहस्रमितानि आवासीय- भवनानि, सोलापुरे च रायनगर- आवास- सोसायटी मध्ये विनिर्मितानि पञ्चदश- सहस्रमितानि आवासीय- भवनानि लाभार्थिभ्यः प्रदाय अमुना प्रोक्तं यत् महाराष्ट्रे एकलक्षाधिकैः परिवारैः आवासाः प्राप्स्यन्ते। "रायनगर आवास-सोसायटी" इत्यस्य लाभार्थिषु पारेसहस्रं हथकरघा इति तूरीवेमा- सीवन- श्रमिकाः, विक्रेतारः, दैनन्दिन- कर्मकराः, अवकरं प्रचीय- विक्रेतारः, वाहनचालकाः चेत्यादयः सम्मिलिताः सन्ति। प्रधानमन्त्री नरेन्द्रमोदी विपक्षं कद्वालोचयन् उक्तवान् यत् प्राक्तनैः शासनारूढ- सर्वकारैः निर्धनता अपाक्रियतामिति उद्घोषः तु प्रदत्तः, किन्तु ते वस्तुतः निर्धनता दूरीकरणे नैव सफलाः जाताः। अमुना प्रोक्तं यत् तस्य सर्वकारः पारदर्शितया साकं कार्यं करोति, येन लाभार्थिभ्यः वास्तविकरूपेण लाभः जायते। सोलापुर-मध्ये प्रधानमन्त्रिणा अमृत- मिशन इत्यभियानान्तर्गतं प्रायः सहस्रकोटि- रूप्यक- मूल्यमितानां परियोजनानाम् आधारशिला अपि स्थापिता। अमुना राज्ये प्रधानमन्त्रि-स्वनिधेः दशसहस्र-लाभार्थिभ्यः धनानुदानस्य प्रथमस्य, द्वितीयस्य च धनपुटकयोः प्रख्यापनमपि प्रारब्धम् अस्ति। अस्मिन् अवसरे महाराष्ट्रस्य राज्यपालः रमेश बैसः, महाराष्ट्रस्य मुख्यमन्त्री एकनाथ-शिन्दे, उपमुख्यमन्त्री देवेन्द्र-फडनवीसः, अजीत-पवारश्च उपस्थिताः आसन्।

## राज्यानि द्वि-अधिकद्विसहस्रतमस्य ध्वजसंहितायाः दृढतया अनुपालनं कारयन्तित्वति-गृहमन्त्रालयः



गृहमन्त्रालयेन प्रदेशाः केन्द्रशासितप्रदेशाश्च एतसनिश्चयाय निर्दिष्टाः सन्ति यत् शासकीय सांस्कृतिक-खेलकार्यक्रमाणाम् अनन्तरं कर्गदनिर्मितानि राष्ट्रियध्वजाचिह्नानि इतस्ततः न प्रक्षेपितत्यानि इति। गणतन्त्रदिवसात् प्राक् गृहमन्त्रालयेन सम्बन्धेऽस्मिन् राज्येभ्यः केन्द्रशासितप्रदेशेभ्यः च पत्रद्वारा दिनिर्देशाः प्रदत्ताः, उक्तञ्च यत् एतादृशानां पताकानां निस्तारणं नैजिकरूपेण ध्वजस्य गरिमानुरूपञ्च भवेदिति । विषयेऽस्मिन् प्रचारादिक्रमैः जनजागृति-अभियानाय अपि राज्यानि सम्प्रार्थितानि सन्ति । गृहमन्त्रालयेन उक्तं यत् राष्ट्रियध्वजः राष्ट्रजनानाम् आशाकांक्षादीनां प्रातिनिध्यं निर्वहति। मन्त्रालयेन उक्तमस्ति यत् राज्यानि द्वि-अधिकद्विसहस्रतमस्य ध्वजसंहितायाः दृढतया अनुपालनं कारयन्तित्वति ।

## अयोध्या

## मुख्यमन्त्रिणा योगि-आदित्यनाथेन अयोध्यायां सज्जतायाः कृता समीक्षा



अयोध्याधाम्नि भगवतः मर्यादापुरुषोत्तम श्रीरामस्य बाल्यविग्रहस्य 'रामलला विराजमान' इत्यस्य प्राणप्रतिष्ठासमारोहस्य सन्नद्धता अन्तिमचरणे वर्तते। मुख्यमन्त्रिणा योगि-आदित्यनाथेन अयोध्यायां सज्जतायाः समीक्षा कृता । तेन टेंटसिटी इत्याख्यस्य अतिथिभ्यः निर्मितस्य अस्थायि-वास-स्थलस्य अपि परिभ्रमणं कृतं, यत्र देशविदेशेभ्यः समागताः अतिथयः निवत्स्यन्ति। अयोध्यया सह समग्रस्य प्रदेशस्यापि सुरक्षाव्यवस्था वरीवर्धिताऽस्ति। एतन्मध्ये अद्यापि प्राणप्रतिष्ठायाः अङ्गीभूतानि नैकानि आनुष्ठानिक कार्याचरणानि तत्र पुरोहितैः सम्पादितानि। येषु देवप्रबोधनम्, औषध्याधिवासः घृताधिवासः, कुण्डपूजनम्, अग्निस्थापनादीनि प्रमुखानि आनुष्ठानिक कर्मकाण्डीय कार्याणि सन्ति। एतानि प्राणप्रतिष्ठातः पूर्ववर्तीनि कर्मकाण्डीयकार्याणि श्रीमतः गणेश्वर-शास्त्रि द्रविडस्य सान्निध्ये सम्पाद्यमानानि सन्ति, यानि जनवरीमासस्य एकविंशतिः तालिकापर्यन्तं प्रचलिष्यन्ति । अस्थायि-मन्दिरे रामललाख्यस्य भगवतः बाल-रामस्य दर्शनाय आराष्ट्रात् श्रद्धालवः आयान्तः सन्ति, अद्य च दर्शनस्य अन्तिमः दिवसो वर्तते। श्वस्तनात् द्वाविंशतिदिनाङ्क यावत् श्रद्धालुभ्यः दर्शनानि वारितानि भविष्यन्ति।

## सुभाषितम्

**अतीत्य बन्धूनवलङ्घ्य मित्राणि**
**आचार्यमागच्छन्ति शिष्यदोषः।**
**बालं ह्यपत्यं गुरवे प्रदातुः**
**नैवापराधोऽस्ति पितुर्न मातुः।।**

**भावार्थ- शिष्य के किए हुए पापकर्म का दोष उसके बन्धुओं और मित्रों पर नहीं बल्कि केवल उसके गुरु पर आ पड़ता है। माता-पिता का अपराध भी नहीं माना जाता, क्योंकि वे तो बाल्यावस्था में ही अपने बच्चों को गुरु के हाथों में समर्पित कर देते हैं।** हिमसंस्कृतवार्ताः, अमितशर्मा

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# चिकित्सकान्दोलनम् - चिकित्सकानां घोषणा यावत् याचनापूर्तिः न भवति तावत् विरोधः निरन्तरं भविष्यति

## द्वितीयदिनेऽपि कृष्णवर्णीयं चिह्नं धृत्वा ओपीडी-मध्ये निरन्तरं सेवाः अकुर्वन्



**हिमसंस्कृतवार्ता- शिमला ।** अधुना शिमलाजनपदस्य चिकित्सालयेषु प्रतिदिनं वैद्याः केवलं कृष्णवर्णीयं चिह्नं धारयित्वा एव सेवां प्रदास्यन्ति। हिमाचल-मेडिकल- आफिसर-एसोसिएशन इत्यनेन आभासीय सभायाः अनन्तरं एषः निर्णयः कृतः। यावत् स्थले आग्रहाः न पूर्यन्ते तावत् विरोधः निरन्तरं भविष्यति इति संघेन घोषितम्।

हिमाचल-मेडिकल-आफिसर- एसोसिएशन् मुख्यमन्त्रिणा सह मिलित्वा गोष्ठीं अकरोत्। सभायां संघस्य अधिकारिणः स्पष्टतया उक्तवन्तः यत् सर्वकारेण तेषां समस्याः अवगन्तव्याः। केवलं एकस्य वर्गस्य वेतनं कर्तयितुं सर्वकारः केवलं एकाधिपत्यस्य भूमिकां निर्वहति इति वैद्याः सभायां अवदन्। कस्यचित् वचनेन सर्वकारः प्रभावितः न भवेत्, यतः पूर्वमेव वैद्यानां पदोन्नतिः न प्राप्ता, अन्यविभागेषु कर्मचारिणां तु पञ्चसप्तवारं पदोन्नतिः भवति। सः अवदत् यत् एवं प्रकारेण केवलमेकवर्गे अन्यायः करणं न युक्तम्।

### जनपदे शताधिकानि प्राथमिकचिकित्साकेन्द्राणि

अस्मिन् मण्डले शताधिकानि प्राथमिकस्वास्थ्यकेन्द्राणि सन्ति । दशाधिकाः सामान्यचिकित्सालयाः सन्ति । एतदतिरिक्तं नागरिकचिकित्सालयाः, सामुदायिकस्वास्थ्यकेन्द्राणि च सन्ति । यतो हि एतासु स्वास्थ्यसंस्थासु सहस्रशः रोगिणः चिकित्सार्थं आगच्छन्ति, यदि वैद्यानाम् आग्रहाः न पूर्यन्ते तर्हि भविष्ये समस्याः उत्पद्यन्ते। वाह्यचिकित्साविभागे चिकित्सायाः अतिरिक्तं रोगिणां शल्यक्रियायाः कृते अपि कष्टानि भवितुम् अर्हन्ति ।

### आपदि प्रशंसनीयं कार्यं कृतम्

आपदा-काले कृतस्य प्रशंसनीयस्य कार्यस्य विषये वैद्याः मुख्यमंत्रिणे सूचितवन्तः। सप्ताहे सप्तदिनानि २४ घण्टाः आपदि आहतानाम् रोगिणां चिकित्सां कर्तुं सः कार्यं कृतवान् इति कथितम्। अतः सर्वकारेण तेषां कार्याणि चिन्तनीयानि।

# अनुदानस्य न्यूनताकारणात् उत्पादनव्ययवृद्ध्या विपत्तौ सेबफलम् चण्डीगढे एकस्मिन् मञ्चे एकत्रिताः उद्यानपालकाः



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** राज्येन केन्द्रसर्वकारेण च क्रियमाणस्य अनुदानस्य न्यूनीकरणस्य कारणात् सेबस्य उत्पादनस्य व्ययः भृशं वर्धमानः अस्ति, यस्मात् कारणात् सेब उत्पादकाः कष्टे सन्ति चण्डीगढ़े एप्पल-फार्मर्स-फेडरेशन-आफ- इण्डिया इत्यस्य द्विदिनात्मकस्य अखिलभारतीय- सम्मेलनस्य प्रथमदिने सेबस्य उत्पादनस्य आव्हानानां विषये चर्चा अभवत्। संघस्य संयोजकः सोहनसिंहठाकुरः अवदत् यत् सेब उत्पादकाः स्वजीविकायाः रक्षणस्य आह्वाए सम्मुखीकुर्वन्ति। सेबस्य कृते समर्थनमूल्यं, अनुदानं, विपणनं च उत्तमव्यवस्था आवश्यकी अस्ति। अस्मिन् सम्मेलने त्रयाणां राज्यानां ८० तः अधिकाः उद्यानविदः प्रतिनिधिः भागं गृह्णन्ति। उर्वरककीटनाशकानां महार्घता, सेबस्य आयातशुल्कस्य न्यूनीकरणम् इत्यादिषु विषयेषु सम्मेलने चर्चा भविष्यति, भविष्यस्य रणनीत्याः च निर्णयः भविष्यति इति कारणेन सेबस्य उत्पादनस्य व्ययः द्विगुणितः जातः। सोहनसिंहठाकुरः अवदत् यत् सेबस्य उद्यानं उद्यानपालकानां कृते हानिकारकं मूल्यं जातम्। उद्यानपालकानां हितं निर्निमेषदृष्टौ स्थापयित्वा निगमकम्पनीनां आज्ञानुसारं सर्वकाराणि कार्यं कुर्वन्ति । आगामि लोकसभानिर्वाचनात् पूर्वं हिमाचल- कश्मीर-उत्तराखण्डयोः उद्यानपालक-सम्मेलनस्य आयोजनं क्रियते, यस्मिन् भविष्यस्य रणनीत्याः निर्णयः भविष्यति।

# १२२ वर्षेषु प्रथमवारं जनवरीमासे न्यूनतमा वर्षा, ऋतुविज्ञानविभागेन विवरणानि प्रकाशितानि



**हिमसंस्कृतवार्ताः- शिमला।** १२२ वर्षेषु प्रथमवारं हिमाचलप्रदेशे अस्मिन् वर्षे १८ जनवरीपर्यन्तं न्यूनतमा वर्षा अभवत्। जनवरी १ तः १८ पर्यन्तं राज्ये सामान्यापेक्षया ९९.७ प्रतिशतं न्यूनवृष्टिः अभवत्। शिमलानगरस्य ऋतुविज्ञानकेन्द्रस्य निदेशकः सुरेन्द्र-पौल इत्यनेन उक्तं यत्, १७ जनवरी दिनाङ्के राज्ये न्यूनतया हिमपातः, वर्षा च अभवत्। सः अवदत् यत् १ जनवरीतः १८ पर्यन्तं राज्ये ४३.१ मि.मी.वृष्टिः सामान्या इति मन्यते। अस्मिन् वर्षे एतावता केवलं ०.१ मि.मी. १९०१ तमे वर्षे उपलब्धानां तथ्यानानुसारं २०२४ तमे वर्षे न्यूनतमा मेघाः दृश्यन्ते। १९६६ तमे वर्षे पूर्वं सामान्यापेक्षया ९९.६ प्रतिशतं न्यूनवृष्टिः अभवत्। १९०२ तमे वर्षे सामान्यापेक्षया ९२.४ प्रतिशतं न्यूनवृष्टिः अभवत्।

# राज्ये षड्दिनानि यावत् वातावरणं स्वच्छं, समतलक्षेत्रेषु नीहारसचेतना

राज्यस्य सर्वेषु भागेषु षड्दिनानि यावत् वातावरणं स्वच्छं भविष्यति इति अपेक्षा अस्ति। तस्मिन् एव काले समतलजनपदेषु केषुचित् भागेषु दिवसद्वयं यावत् नीहारस्य, शीततरङ्गस्य च सचेतना प्रसारिता अस्ति। ऋतुविज्ञानकेन्द्रशिमला-अनुसारं राज्यस्य सर्वेषु भागेषु जनवरीमासस्य २४ दिनाङ्कपर्यन्तं वातावरणं स्वच्छं भविष्यति इति पूर्वानुमानम् अस्ति। यत्र २० जनवरीपर्यन्तं ऊना-काङ्गड़ा, बिलासपुर-मण्डी-जनपदेषु विभिन्नेषु स्थानेषु शीततरङ्गस्य, हिमस्य च स्थितिः निरन्तरं भविष्यति इति अपेक्षा अस्ति। तस्मिन् एव काले आगामिदिनद्वये बिलासपुर-ऊना, काङ्गड़ा (नूरपुर), सिरमौर (पौंटा साहब तथा धौला कुआं) सोलनम् (बद्दी तथा नालागढम्) विभिन्नेषु भागेषु प्रातःकाले सघननीहारस्य सम्भावना वर्तते। एतादृशे सति सावधानतया यात्रां कर्तुम् उपदेशः दत्तः अस्ति।

# जनवरीमासे न्यूनतमवर्षायुक्तं वर्षम्

## ऋतुविभागेन १९०१ तमात् वर्षात् न्यूनतमवृष्टियुक्तानां शीर्षदशवर्षानाम् विवरणानि प्रकाशितानि सन्ति।

### २६ जनवरीतः १ फरवरीपर्यन्तं वर्षा, हिमपातः च भवितुम् अर्हति

ऋतुविभागस्य विस्तारितायाः वातावरणस्य पूर्वानुमानस्य अनुसारम् उपरि दत्तस्य मानचित्रस्य अनुसारं २६ जनवरीतः १ फरवरीपर्यन्तं राज्यस्य अनेकभागेषु वर्षा, हिमपातः च भवितुम् अर्हति अस्मिन् काले लाहौल- स्पीति, किन्नौरं, शिमला, सिरमौरं, सोलनम्, ऊना, हमीरपुरम्, बिलासपुरम्, मण्डी, कुल्लू इत्यादीनां केषुचित् भागेषु औसतवृष्टिः सामान्या घोषिता अस्ति। शेषराज्यस्य कृते अपि तथैव सामान्यम्।

| वर्षम् | वर्षा |
|---|---|
| २०२४ (१८ जनवरी २०२४ तक) | -९९.७ |
| १९६६ | - ९९.६ |
| २००७ | - ९८.५ |
| १९०२ | - ९२.४ |
| १९८६ | - ९१.४ |
| २०१८ | - ९०.५ |
| १९१६ | - ८७.८ |
| १९३६ | - ८६.५ |
| १९६३ | - ८३.५ |
| १९९८ | - ८३.४ |
| १९१४ | - ८१.४ |

# इतिहासविभागः- सरदारपटेलविश्वविद्यालयः मंडी इत्यस्य विद्यार्थिभ्याम् उत्तीर्णा यू जी सी नेट परीक्षा

**हिमसंस्कृतवार्ताः- डॉ. राकेश शर्मा/ डॉ. अमित शर्मा** सरदारपटेलविश्वविद्यालय मंडी इत्यस्य इतिहास विभागस्य द्वाभ्यां विद्यार्थिभ्यां कर्मा दोरजे नेगी, उत्सव जयसूर्यः इत्येताभ्यां यूजीसीद्वारा आयोजिता नेट परीक्षा उत्तीर्णा। सूचनेयं विभागाय विश्वविद्यालयाय च हर्षस्य गर्वस्य च विषयोऽस्ति। कर्मा दोरजे मूलतः किन्नौरस्य हंगरंग उपमण्डलस्य हांगो ग्रामस्य निवासी अस्ति। तस्य पिता प्रकाश चंद कृषकः वर्तते। सः इतिहासविभागस्य स्नातकोत्तर- तृतीयसत्रस्य विद्यार्थी वर्तते। यद्यपि उत्सव जयसूर्यः च इतिहासविभागे डॉ राकेशकुमारशर्मावर्यस्य मार्गदर्शने विद्यावारिधि शोधकार्यं कुर्वन्नस्ति। उत्सव द्वितीयवारं यूजीसी नेटपरीक्षा उत्तीर्णा। सरदारपटेलविश्वविद्यालय मंडी इत्यस्य प्रतिकुलपतिः आचार्य अनुपमा सिंहः इतिहासविभागस्य उभाभ्यां विद्यार्थिभ्यां शुभकामनाः प्रयच्छत्। इतिहासविभागस्य प्रभारी, सहायकाचार्यः डॉ. राकेश कुमार शर्मा अपि उभाभ्यां छात्राभ्यां वर्धापयन् अवदत् यत् इदं तयोः कठिनपरिश्रमस्य एव फलम्। तौ विभागस्य विश्वविद्यालयस्य च गौरवं वर्धितवन्तः। कर्मा दोरजे उक्तवान् यत् इयं सफलता ईश्वरस्य, पित्रोः, प्राध्यापकाभ्यां च आशीर्वादस्य मार्गदर्शनस्य च फलमस्ति। उत्सवेन उक्तं यत् तेन द्वितीयबारं इयं परीक्षा उत्तीर्णा। मात्र अंकद्वयेन जे. आर. एफ. इति अवशिष्टः। आचार्य राजेशकुमारशर्मा, अधिष्ठाता महाविद्यालय-विकासपरिषद्, इतिहासविभागस्य सहायकाचार्य डॉ. रामपालः, विकेशकुमारः, राजेशशर्मा, इतिहास समूहस्य अध्यक्षा पुनीत भारती, समूहस्य पदाधिकारिभिः सदस्यैः सहितं सर्वैः विद्यार्थिभिः शुभकामनाः प्रदत्ताः।



उत्सवः



कर्णः

# सर्वकारस्य दृष्टिः कोचिंग संस्थानेषु वर्तते, अधुना १६ वर्षाणाम् अधः बालकाः संस्थानेषु प्रवेशं न प्राप्नुयुः



**हिमसंस्कृतवार्ताः- कुणाल कौशिक, मोतिहारी**
प्रशिक्षणसंस्थानां स्वैच्छिकमनोवृत्तिं निवारयितुं केन्द्रसर्वकारेण महती कार्यवाही कृता। वस्तुतः केन्द्रीयशिक्षामन्त्रालयेन कालमेव एतेषां संस्थानां कृते नूतनाः मार्गदर्शिकाः निर्गताः। एतेन देशे छात्राणाम् आत्महत्यायाः वर्धमानाः प्रकरणाः अपि न्यूनीभवन्ति इति सर्वकारस्य मतम्। मार्गदर्शिकानुसारम् अधुना कोऽपि प्रशिक्षणसंस्था १६ वर्षाणाम् अधः छात्रान् स्वसंस्थायां नामाङ्कनं कर्तुं न शक्नोति। एतेन सह अनेके महत्त्वपूर्णाः मार्गदर्शिकाः निर्गताः, प्रशिक्षणसंस्थाभ्यः स्पष्टनिर्देशाः दत्ताः यत् इदानीं ते न उत्तमपदस्य गारण्टीं दातुं शक्नुवन्ति न च भ्रामकप्रतिज्ञां कर्तुं शक्नुवन्ति। अधुना प्रशिक्षणसंस्थाः स्नातकपदवीं प्राप्तुं न्यूनशिक्षां कृत्वा अपि अध्यापकानाम् नियुक्तिं कर्तुं न शक्नुवन्ति। अधुना माध्यमिक-विद्यालय- परीक्षायाः अनन्तरमेव छात्राणां नामाङ्कनं कर्तव्यं भविष्यति। अधुना प्रशिक्षणसंस्थानां कृते अपि जालपुटं निर्मातव्यं भविष्यति। एतेषु स्थलेषु अध्यापकानाम् शैक्षिकयोग्यतायाः, पाठ्यक्रमस्य, तान् पूर्णं कर्तुं गृहीतसमयस्य, छात्रावासस्य सुविधानां, शुल्कस्य च अद्यतनविवरणं भविष्यति। अधुना यावत् परामर्शव्यवस्था न भवति तावत् कस्यापि प्रशिक्षणसंस्थायाः पञ्जीकरणं न भविष्यति। अवसादस्य अथवा तनावपूर्णस्थितौ छात्राणां कृते तत्कालं समर्थनं दातुं संस्थानां कृते एतानि तन्त्राणि स्थापयितुं महत्त्वपूर्णम् इति सर्वकारस्य मतम्। प्रशिक्षणकेन्द्रेषु विभिन्नपाठ्यक्रमेषु शिक्षणशुल्कं उचितं स्थापनीयं भविष्यति। अधुना शुल्कस्य प्राप्तिः अपि अनिवार्यः भविष्यति। यदि कश्चन छात्रः पूर्णपाठ्यक्रमशुल्कं दत्त्वा पाठ्यक्रमं मध्यमार्गे त्यजति तर्हि शेषशुल्कं १० दिवसेषु तस्मै प्रत्यागमिष्यति। केन्द्रसर्वकारेण अपि सुझावः दत्तः यत् यदि प्रशिक्षणकेन्द्राणि अधिकं शुल्कं गृह्णन्ति तर्हि तेषु एकलक्षरूप्यकपर्यन्तं दण्डः स्थापनीयः। तेन सह संस्थायाः पञ्जीकरणं अपि निराकर्तुं शक्यते। एतेषां मार्गदर्शिकानां प्रभावात् त्रयः मासाः अन्तः नूतनानां पूर्वमेव विद्यमानानाञ्च प्रशिक्षणकेन्द्राणां पञ्जीकरणं कर्तुं सर्वकारेण अपि प्रस्तावः कृतः।

# एन.डी.आर.एफ. इति राष्ट्रियापदामोचन- बलम्
## सप्तति-सहस्राधिकेभ्यः जनेभ्यः
### आपदा प्रबन्धनार्थं प्रशिक्षणं प्रदास्यति

गृह-राज्यमन्त्री नित्यानन्द-रायः प्रत्यपादयत् यत् एन.डी.आर.एफ. इति राष्ट्रियापदामोचन- बलम् अस्य वर्षस्य समापनं यावत् सप्तति-सहस्राधिकेभ्यः जनेभ्यः आपदा प्रबन्धनार्थं प्रशिक्षणं प्रदास्यति। असौ अद्य नव-दिल्ल्यां एनडीआरएफ इति राष्ट्रियापदामोचन-बलस्य एकोनविंशं स्थापना-दिवस-समारोहं सम्बोधयति स्म। अमुना प्रोक्तं यत् अधुना यावत् एन.डी.आर.एफ. बलेन त्रयोदश सहस्राधिकाः स्वयं सेवकाः प्रशिक्षिताः सन्ति।

# गणतन्त्र-दिवसे वायुसैन्य-बलस्य भव्यप्रदर्शनम्

गणतन्त्र दिवसस्य अवसरे अस्मिन् वर्षे फ्लाई पास्ट इति कार्यक्रमे वायु-सैन्य बलस्य एकोन- त्रिंशद् विमानानि, अष्ट-मितानि भार-वाहि-विमानानि, त्रयोदश-मितानि उदग्र-यानानि, एकं रिक्थ-विमानं च समेत्य आहत्य एक-पञ्चाशद् विमानानि गगने उड्डयन-लीलां करिष्यन्ति। वायुसेनायाः अधिकारिणाम् अनुसारेण राफेल, सुखोई- त्रिंशत्, जगुआर, सी- त्रिंशदुत्तरैक- शतम्, तेजस चेति विमानानि पृथक् पृथक् प्रारूपेषु फ्लाईपास्ट इति उड्डयन-लीला-कौतुकं प्रदर्शयिष्यन्ति। अस्मिन् वर्षे सैन्य-प्रयाणस्य अवसरे वायु-सैन्य-बलस्य पथसञ्चलन-दलस्य नेतृत्वं महिला अधिकारी कुरुते। एतासु स्क्वाड्रन नायिका रश्मि ठाकुरः, सुमिता यादवः, प्रतीतिः अहलुवालिया, फ्लाइट लेफ्टिनेंट कीर्ति रोहिलः च सामाविष्टाः सन्ति। पथ-सञ्चलन-दले चतुश्चत्वारिंशदुत्तर- एकशतं वायुबलयोद्धारः भागं भजिष्यन्ते ।




# शेयरविपणिः क्रमशः दिवसत्रयस्यक्षयानन्तरं सकारात्मकतायाः सह स्थगितः अभवत्

**(हिमसंस्कृतवार्ताः - दिलीपः (नादौनम्)**
शुक्रवासरे निवेशकाः पुनः निःश्वासं गृहीतवन्तः। वैश्विकस्तरस्य सकारात्मकसंकेताः शेयरविपणः उत्तमं समर्थनं दत्तवन्तः। कारणात् गृहइक्विटीबेन्चमार्कसूचकाङ्काः बी०एस०ई० इत्यस्य सेन्सेक्सः एन०एस० ई० इत्यस्य च निफ्टी दृढलाभेन सह स्थगितौ गतौ । अस्य उल्लासस्य कारणात् बीएसई इत्यत्र सूचीकृतानां कम्पनीनां मार्केट् कैप् ४.०७ लक्षकोटिरूप्यकाणां वृद्धिः अभवत् अर्थात् निवेशकानां धनं ४ लक्षकोटिरूप्यकात् अधिकं वर्धितम्। अस्मात् पूर्वं निवेशकानां त्रिदिनेषु ६.६ लक्षकोटिरूप्यकाणां हानिः अभवत् ।
इदानीं इक्विटी बेन्चमार्क सूचकाङ्कानां विषये वदन् सेन्सेक्सः ४९६.३७ अंकाः अथवा ०.७० प्रतिशतं वृद्ध्या ७१६८३.२३ मध्ये स्थगितः अभवत् तथा च निफ्टी १६०.१५ अङ्काः अथवा ०.७५ प्रतिशत् वृद्ध्या २१६२२.४० इति स्थाने समाप्तः। अधुना क्षेत्रविषये वदन् अधिकांशः निफ्टी सूचकाङ्कः हरितक्षेत्रे स्थगिताः अभवन् । परन्तु निफ्टीबैङ्कः केवलं ०.०३ प्रतिशतं यावत् एव लाभन्वितः अभवत् ।

# के. के. पाठकः श्वः आरभ्य पुनः क्रियायां, अवकाश-दिनानन्तरं प्रत्यागतवान्



**हिमसंस्कृतवार्ताः- कुणाल कौशिक, मोतिहारी**
बिहारस्य प्रसिद्धः भारतीय- प्रशासनिक- सेवापदाधिकारी, शिक्षाविभागस्य अतिरिक्त- मुख्यसचिवश्च के. के. पाठकः अवकाशं समाप्य पटनां प्रत्यागतवान्। शुक्रवासरे प्रत्यागतः केके पाठकः सचिवालयस्य शिक्षाविभागस्य कार्यालयं प्राप्तवान्, यत्र सः कार्यभारं स्वीकृत्य कार्यम् आरब्धवान्। सूचनानुसारं केके पाठकः अधुना शनिवासरे प्रातः १० वादने विभागाधिकारिभिः सह उपावेशनं करिष्यति। ज्ञातव्यं यत् के. के. पाठकः ८ जनवरीतः अवकाशे आसीत्। सः सर्वकारस्य निर्देशानुसारम् अपरमुख्यसचिवपदात् त्यागपत्रं दत्तवान् आसीत्। अस्मिन् काले विभागसचिवः वैद्यनाथ यादवः अपि अपर मुख्यसचिवस्तरस्य कार्यस्य निरीक्षणं कुर्वन् आसीत्। उल्लेखनीयं यत् केके पाठकः स्वास्थ्यकारणात् ८ जनवरी दिनाङ्के अवकाशं गन्तुम् आवेदनं कृतवान् आसीत्। सः पूर्वं जनवरी-त्मासस्य १४ दिनाङ्कपर्यन्तं आवेदनं कृतवान् आसीत्। पश्चात् सः १६ जनवरीपर्यन्तं अवकाशं विस्तारितवान्। गुरु गोविन्दसिंह जयंती इत्यस्य कारणात् १७ जनवरी दिनाङ्कः सार्वजनिक अवकाशः आसीत्। एतादृशे परिस्थितौ के. के. पाठकः १८ जनवरी दिनाङ्के कार्याय पुनः आगन्तुम् अभवत्। इदानीं १७ जनवरी दिनाङ्कस्य सायं कालस्य समाचारः आगतः यत् के. के. पाठकः अधुना ३० जनवरीपर्यन्तम् अवकाशं प्राप्स्यति, सः अवकाशस्य अवधिं विस्तारितवान्। परन्तु अवकाशस्य विस्तारस्य आधिकारिकरूपेण पुष्टिः न अभवत्। केके पाठकः अवकाशस्य विस्तारस्य अनन्तरं सः क्रुद्धः इति चर्चाः आरब्धाः। एतादृशे सति शिक्षाविभागस्य अतिरिक्तमुख्यसचिवपदार्थं नूतनाधिकारिणः अन्वेषणं क्रियते। परन्तु एतस्मिन् समये भवननिर्माणमन्त्री, मुख्यमंत्री नीतीशकुमारः निकटसहायकः च अङ्गीकृतवन्तः आसन्। के. के. पाठकः अतीव उत्तमः अधिकारी अस्ति, उत्तमं कार्यं च कुर्वन् अस्ति इति सः उक्तवान् आसीत्। केके पाठकः नीतीशकुमारस्य दृष्टौ कार्यं कुर्वन् अस्ति इति सः उक्तवान् आसीत्। केके पाठकः अवकाशं प्राप्य द्वितीयचरणस्य नियुक्तानां शिक्षकाणां कृते १३ जनवरी दिनाङ्के नियुक्तिपत्राणि वितरितानि आसन्। तथापि अस्मिन् विषये कार्यं पश्चात् आरब्धम्। इदानीं के. के. पाठकः अवकाशात् प्रत्यागतवान् इति कारणेन विभागस्य कार्यं पुनः द्रुततरगत्या भवितुम् आरभेत्।

# मण्डीजनपदस्य त्रिषु शिक्षाखण्डेषु विद्यालयसमयसूचौ परिवर्तनम्

**हिमसंस्कृतवार्ताः- मण्डी।** जिलादण्डाधिकारी मण्डी अरिन्दम चौधरी मण्डी जनपदस्य केषुचित् समतलक्षेत्रेषु सघनप्रभात- नीहारकारणात् बालकानां स्वास्थ्यसुरक्षां ध्यानं दत्त्वा बल्ह, सलवाहन, औट शिक्षाखण्डस्य सर्वेषां निजी तथा सर्कारीय विद्यालयानां समयसूचीं परिवर्तितवान्। यस्य अन्तर्गतम् एतेषां शिक्षाखण्डानां सर्वे निजी-

## सर्वकारीय- विद्यालयाः प्रातः ९:३० वादनतः अपराह्न ३:३० वादनपर्यन्तम् उद्घाटिताः भविष्यन्ति।

परन्तु आदेशानुसारम् उपर्युक्तविद्यालयानां पिधानकरणसमयः पश्चात् सम्बन्धितेन प्राथमिक-उच्चशिक्षा-उपनिदेशकेन विस्तारयितुं शक्यते। प्राथमिक- उच्चशिक्षा- उपनिदेशकान्, सम्बन्धितक्षेत्रस्य विद्यालयानां प्राचार्यैः च एतेषाम् आदेशानां दृढतापूर्वकं पालनं कर्तुं कथितम् अस्ति। एते आदेशाः तत्कालं प्रभावेण प्रवर्तन्ते। ३१ जनवरीपर्यन्तं अथवा अग्रिम- आदेशपर्यन्तं निरन्तरं भविष्यति।



# ।। श्रीरामायणकथा ।।

## लङ्काकाण्डम्! (एकषष्टितमः सर्गः)



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

### इन्द्रद्वारा अमृतसेचनेन वानरसैन्यानां पुनर्जीवनम्



प्रतिप्रयाते दशरथे परमप्रीतः देवराजः इन्द्रः प्राञ्जलिं स्थितं रामम् अब्रवीत् हे परन्तप राम! अस्माकं कृते तव दर्शनम् अमोघम्। तव दर्शनेन वयं सन्तुष्टाः स्मः। अतः त्वं मनसा ईप्सितं किमपि ब्रूहि। प्रसन्नेन महात्मना महेन्द्रेण एवमुक्तः सुप्रसन्नमनाः राघवः वचनम् अब्रवीत् हे देवेन्द्र! यदि मयि तव प्रीतिः समुत्पन्ना तर्हि मम वचनं सत्यं कुरु। मम हेतोः ये पराक्रान्ताः वानराः यमसादनं गताः ते सर्वे पुनः जीवितं प्राप्य समुत्तिष्ठन्तु। हे मानद! मत्कृते ये वानराः पुत्रैः भार्याभिः च विप्रयुक्ताः अभवन् तान् प्रीतमनसः सर्वान् अहं द्रष्टुम् इच्छामि।
हे पुरन्दर! ये विक्रान्ताः शूराश्च मम विजयार्थं स्वीयं मृत्युम् अगणयित्वा यत्नं कृत्वा विपन्नाः अभवन् तान् जीवय। हे देवराज! ये मत्प्रियेषु अभिरक्ताः मृत्युं न गणयन्ति ते पुनः मया सह सम्मिलिताः भवन्तु इति त्वत्प्रसादात् अहम् एतं वरं वृणे। अहं तान् ऋक्षान् वानरान् चापि पुनः निर्व्रणान् सम्पन्नबलपौरुषान् द्रष्टुम् इच्छामि। अपि च यत्र ते वानराः तिष्ठेयुः तत्र अकाले अपि पुष्पाणि च फलानि च मूलानि च नद्यश्च विमलाः भवन्तु। महात्मनः श्रीरामस्य वचनं श्रुत्वा देवराजः इन्द्रः प्रीतिलक्षणं वचनं प्रत्यवदत् हे रघूत्तम! यस्त्वया उक्तः सः महान् वरः अस्ति। परन्तु मम वचनं कदापि वितथं न भविष्यति। त्वं यदिच्छसि तदेव प्राप्स्यसि।
हे राघव! युद्धे ये वानराः ऋक्षाः च राक्षसैः हताः अभवन् ते निद्राक्षये सुप्ताः इव नीरुजाः निर्व्रणाः सम्पन्नबलपौरुषाः सन्तः पुनः समुत्थास्यन्ति। पुनः ते सुहृद्भिर्बान्धवैः ज्ञातिभिः स्वजनैः च सह अत्यन्तं हृष्टाः सन्तः मेलिष्यन्ति। अपि च अकाले पुष्पशबलाः फलवन्तः च पादपाः, नद्यश्च सलिलाप्लुताः भविष्यन्ति। ततः सर्वे हरिसत्तमाः निर्व्रणैः समैः समुत्थिताः अभवन्। ते सर्वे समुत्थाय एतत् किम् इति कृत्वा विस्मिताः अभवन्। तदानीं रामं परिपूर्णं दृष्ट्वा परमप्रीताः देवाः सलक्ष्मणं रामम् अब्रुवन् हे परन्तप! इदानीं वानरान् विसर्ज्य इतः अयोध्यां गच्छ। स्वैनाम् अनुरक्तां यशस्विनीं मैथिलीं सान्त्वय। शोकसन्तप्तं व्रतचारिणं भ्रातरं भरतं, महात्मानं शत्रुघ्नं, मातॄः सर्वाः च सान्त्वय। तत्र गत्वा आत्मानम् अभिषेचय, पौरवासिनः अमात्यान् च प्रहर्षय। सलक्ष्मणं रामम् एवमुक्त्वा देवराजः इन्द्रः सुरैः सह सूर्यसङ्काशैः विमानैः अगच्छत्। श्रीरामः तदा भ्रात्रा लक्ष्मणेन सह तान् सर्वान् देवान् अभिवाद्य वानराः सर्वे अवस्थिताः भवन्तु तदर्थम् आज्ञापयत्। ततः रामलक्ष्मणपालिता वानराणां यशस्विनी महाचमूः श्रिया ज्वलन्ती विराजते स्म।

# मंशापूर्णामहादेवधाम इत्यत्र भविष्यति 22 जनवरी दिनाङ्के दीपोत्सवस्य आयोजनम्



हिमसंस्कृतवार्ताः- कुणाल कौशिक, मोतिहारी

बिसही दीपोत्सवस्य आयोजनं 22 जनवरी दिनाङ्के मङ्करियायाः बिसही १०८ शिवलिंगमंशापूर्णा महादेवमन्दिरे कृतम्। अयोध्यायां भगवान् श्रीरामस्य जीवनस्य अभिषेकस्य विषये कृतम्, सियाराम दीपावली च बिसाही धामनगरे आचर्यते। अस्य विशालस्य कार्यक्रमस्य सफलं कर्तुं विहिप- बजरङ्गदलस्य कार्यकर्तृभिः खण्डक्षेत्रे अभियानं प्रचलति। अभियानस्य अन्तर्गतं श्रमिकाः द्वारे द्वारे गत्वा स्त्रीपुरुषैः सह सम्पर्कं कृत्वा २२ जनवरी दिनाङ्के बिसाहीधामम् आगन्तुं आमन्त्रयन्ति। तेन सह भगवतः श्रीरामस्य अभिषेकदिने सोमवासरे सायं विहिप-बजरङ्गदल-सदस्याः बिसहिये धामस्थिते १०८ शिवलिंग-मंशापूर्ण-महादेवमन्दिरे प्रत्येकं गृहात् एकं दीपम् आनेतुं जनान् आमन्त्रितवन्तः। नागनारायणसिंहः अवदत् यत् अस्मिन् अवसरे सुन्दरकाण्डस्य पाठः भव्यमेला च बिश्रीधामनगरे भंडारस्य आयोजनमपि कृतम्। अस्मिन् अभियाने अपि बजरंगदलस्य अनुमंडलकार्यकारिणी दीपक तिवारी, सदस्यः विवेक सिंहः, आदित्यसिंहः, अमन सिंहः, किसभ सिंहः, अंकित सिंहः, शोभित दुबेः, मनीष सिंहः सुभाष सिंहः, विकास सिंहः राकेश सिंहः इत्यादयः समाविष्टाः सन्ति।

# ।। महाभारतकथा ।।

## (भीष्म पर्वः) महाभारतस्य प्रथम-द्वितीय-तृतीय दिनस्य युद्धम्







हिमसंस्कृतवार्ताः
✍दिलीपः,संस्कृतशिक्षकः
शिक्षाविभागः हि.प्र.

श्रीकृष्णस्य उपदेशानन्तरं अर्जुनः विषादमुक्तः अभवत्, युद्धस्य आरम्भः अभवत् । कौरव सेनापतिः भीष्म आसीत् यत्र शक्ति सम्पन्नाः महाधनुर्धराः भीष्म-द्रौण-कर्णादयः आसन् दुःशासनः तु प्रायः कौरवसेनायाः अग्रणी वीरः आसीत्, अपरे च पाण्डवसेनापतिः धृष्टद्युम्नः आसीत् परन्तु प्रमुखधनुर्धरः तु अर्जुनः आसीत् भीमसेनः च पाण्डवसेनायाः अग्रणी योद्धा आसीत् ।
प्रथमे दिवसे भयङ्करः युद्धः अभवत् । प्रथमदिनस्य युद्धे भीष्मः पाण्डवान् उपरि एतादृशं आक्रमणं कृतवान् यत् पाण्डवसेना कम्पितवती । युधिष्ठिरस्य मनसि भयं पूरितम्। येन दुर्योधनः आनन्दितः दृष्टः परं आतङ्किताः पाण्डवाः श्रीकृष्णस्य समीपं गतवन्तः। श्री कृष्णः युधिष्ठिरं पाण्डवसेनाञ्च शान्तं कर्तुं प्रयत्नम् आरब्धवान् ।
प्रथमदिवसस्य युद्धे पाण्डवसेनायाः दुर्दशा अभवत् ।
अतो पाण्डवसेनानायकः धृष्टद्युम्नः द्वितीयदिने अतिसावधानमनसा व्यूहनिर्माणं कृत्वा सैनिकानाम् साहसं वर्धितवान् ।
सम्पूर्णकौरवसेनायां अर्जुनेन सह स्पर्धां कर्तुं त्रयः एव वीराः आसन् - भीष्म, द्रोणः, कर्णः च । सर्वान् कौरवयोद्धान् प्रतिरोधं दृष्ट्वा अर्जुनः स्व गाण्डीव नामकं धनुं हस्ते गृहीत्वा एतादृशेन कौशलेन युद्धं कृतवान् यत् कौरवसेनायाः सर्वे महायोद्धारः स्तब्धाः अभवन् । परन्तु भीष्मः अर्जुनं प्रबलतया आक्रमितवान्। एवं प्रकारेण अर्जुन-भीष्मयोः युद्धं चिरकालं यावत् अचलत्, भीष्मः पाण्डवसेनायाः दुर्विनाशं कर्तुं आरब्धवान्, भीष्मस्य रौद्ररूपं दृष्ट्वा पाण्डवाः पुनः भयभीताः अभवन् ।
तृतीये दिने द्वयोः सेनयोः व्यूह निर्माणानन्तरं पुनः परस्परं आक्रमणं प्रारभत् । दुर्योधनः भीमसेनस्य बाणप्रहारेण आहतः भूत्वा रथस्य उपरि एव पतितः । इति दृष्ट्वा तस्य सारथिः अचिन्तयत् यत् कथं दुर्योधनं युद्धक्षेत्रात् अपसारयितव्यमिति । कौरवसेनां दुर्योधनस्य अचेतनायाः ज्ञानं न भवेत् एतैः विचारैः प्रेरितः सः सारथिः शीघ्रं रथं युद्धक्षेत्रात् शिबिरं प्रति चालितवान्, परन्तु तस्मिन् समये यत् घटितं तत् तस्य अपेक्षितायाः विपरीतमेवासीत् । यतोहि सेनायां अनुशासनस्य, अराजकतायाः च भङ्गस्य कारणं सः एव अभवत् । सैनिकानाम् मध्ये वैचल्यं विस्तृतम् ।
अत्र पाण्डवसेनायां आनन्दः आसीत् । येन प्रकारेण तैः तृतीय दिनस्यप्रथमे भागे कौरवसेनामाक्रम्य विकीर्णं कृतम्, तथैव भीष्मः एतां विकीर्णां सेनां पुनः सङ्गृह्य तान् आक्रमयिष्यति इति ते न अपेक्षितवन्तः आसीत् । भीष्मः एतादृशं भयङ्करं आक्रमणं कृतवान् येन पाण्डवसेना उद्धता अभवत्। श्रीकृष्ण-अर्जुन-शिखण्डी-प्रयत्नानाम् अभावेऽपि सेना अनुशासिता न स्थातुं शक्नोति स्म । भीष्मस्य अनेके बाणाः अर्जुनस्य श्रीकृष्णस्य च शरीरयोः आहतवन्तः। तेन श्रीकृष्णः अत्यन्तं क्रुद्धः अभवत्। अर्जुनः तान् शरान् प्रतिरोधयितुं न शक्तवान्। अतः क्रोधवेष्टितः श्रीकृष्णः स्वयमेव भीष्मस्य वध कर्तुं निश्चयं कृतवान् । एतत् दृष्ट्वा अर्जुनः स्तब्धः अभवत् । एतत् महती आपदा भविष्यति इति सः चिन्तितवान् । रथात् अवतीर्य श्रीकृष्णः स्वयमेव भीष्मस्य पश्चात् धावितवान्। अर्जुनस्य आग्रहेण श्रीकृष्णः पुनः आगत्य पुनः अर्जुनस्य रथं चालयितुं आरब्धवान् । सम्प्रति अर्जुनः उत्साहितः अभवत्, सः कौरवसेनायाः उपरि वज्रवत् आक्रमणं कृतम्। सायं यावत् कौरवसेना दुर्पराजिता अभवत् । सूर्यास्ताचलं प्रति गतमासीत् तदैव तृतीय दिनस्य समाप्तिं शङ्खनादेन सह अभवत् । श्रान्ता सेना स्वशिबिरान् प्रति प्रत्यागतवती ।



अयोध्यायाः गर्भगृहात् भगवतः श्रीरामचन्द्रस्य साक्षात् दर्शनम्

दैनिक ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः